# ॥ षष्ठोऽध्याय: ॥

## भोजव्याकरणकाराणां महोपाध्याय-श्रीविनयसागरसूरिणां संस्कृतव्याकरणशास्त्रपरंपरायां-प्रदानम् - (योगदानम्)

### (१) जैनतत्त्वदर्शनसिद्धान्तानां समावेशनम् ।-

हे देव कुरु कारुण्य (भो.व्या १-६.२४) मिति पद्ये (१) सारस्वतसूत्रस्य भोस्-भगोस् अघोस् (सा. १-१३.३) इत्यस्योदाहरणतयेदं ज्ञायते यत् अस्मिन् पद्ये महोपाध्यायश्रीविनयसागरस्य जैनधर्मित्वात् जिन इति सम्बोधनं वर्तते ।

### (२) धर्मनिरपेक्षता -

देवावुभौ शमुभये हरिशङ्कराख्यौ (१-६.४६/४७) इति पद्यद्वये (२) नित्यं द्विवचनान्तस्य उभशब्दस्य रूपाणि हरिं च शङ्करं चोद्दिश्य प्रदत्तानि, येन महोपाध्यायस्य धर्मनिरपेक्षता व्यज्यते ।

विभ्राजते त्रिभुवने हरिरेकदेव: (भो.व्या १-६.६६/६७) इति पद्यद्वये (३) हरि शब्दस्य एकवचनान्तरूपाणि प्रदत्तानि । ग्रन्थकर्तु: जैनधर्मित्वात् ' शङ्खेश्वराख्यमिह तीर्थमिदं हरेश्च ' इति प्रयोग: सूचकरूपेण कृतो वर्तते । तत्र हरे: विष्णोरेव माहात्म्यं सर्वप्रकाशप्रकाशितवस्तुवत् दरीदृश्यते । हस्तामलकवच्च बालकानामपि अनिवार्यता स्वीकरणीया एव, तथापि पूर्ववर्तिभि: जैनधर्मधुरन्धरै: धर्मसहिष्णुता-विमुखान्त:करणैरस्मिन्पद्ये (१) पद्मा हरिं भुनक्ति (२) बलि: क्षिप्त: (३) त्रिलोक्यां सकलवस्तु हरे: जातमिति च सुस्पष्टलिङ्गानां दर्शनेनाऽपि सन्तोषमलभमानै: विद्वद्वृन्दं व्याकरणजिज्ञासुंश्च अपथं नीयमानै: ' खुलासो ' इति शीर्षकेन सह भोजव्याकरणस्य प्रकाशितग्रन्थारम्भे स्पष्टता कृता । (४)

स्वामी वां स जहासौचै (भो.व्या. १-१३.१६) रित्यत्र (५) राज्ञो मधुसूदनस्य च स्पष्टनिर्देशन राज्ञ: मनुष्यत्वात् दानस्य महिमा प्रकटीकृत: । किन्तु मधुसूदनस्य श्रीविष्णो: निर्देशेन ज्ञानदाताऽथ च आत्मज्ञानदानसमर्थ: श्रीविष्णुदेव एवेति दर्शयति महोपाध्याय: । तेन चाऽस्य ग्रन्थकर्तु: धर्मसहिष्णुता दरीदृश्यते ।

देवो वामवताविष्णु: (भो.व्या. १-१३.१७) अस्मिन् पद्येऽपि (६) ग्रन्थकर्तु: धर्मसहिष्णुत्वं प्रकटीभवति । यथा भगवान् विष्णु: जनार्दन: वा, वां (युवाम्) नौ (आवाम्) च नरकात् अवतात् (रक्षतु) इति भावो वर्तते । अत्र तातङादेशे कृते अवतात् इति रूपं भवति ।

### (३) सर्वत: सङ्कलनम् ।-

ब्रह्मघ्नश्चाऽथ ब्रह्मघ्न (भो.व्या १-१०.३७) इत्यस्मिन् पद्ये (७) ब्रह्मघ्न: द्वितीया बहुवचनम्, ब्रह्मघ्ना इति च तृतीयैकवचनम् । ततश्च हनोघ्न: (सा. १-९.२९) इत्यत्र ञित्-णित् प्रत्यययोरपि समावेशात् णित् प्रत्यये (लिट् लकारे) प्रथमपुरूषैकवचने जघान इति । ञित् प्रत्यये, आदि स्वरस्य ञ्णितिवृद्धि: (सा. १-१५.२) इति सूत्रेण ब्राह्मघ्नि: (ब्रह्महत्याकर्तु: पुत्र:) इति ज्ञापयति ।

दृश्-स्पृश्-सृज्-क्रुञ्च् (भो.व्या. १-१०-८४) इत्यस्मिन् (८) पद्ये दिशाम् (सा. १-१०-१०) इति सूत्रे बहुवचनकथनात् दृश्-स्पृश्-सृज् इत्यादीनां कवर्गादिशो (कुत्वं) भवति । ततश्च दृक्-स्पृक्-सृक् इत्यादि रूपाणि कुत्वकरणात् भवन्ति ।

प्रतीची तु स्त्रियां रूपमि-(भो-व्या-१-१०-८७) त्यस्मिन् पद्ये (९) प्रत्यक् शब्दस्य नुमागमे प्रत्यङ्क्, एवं चुत्वे (चवर्गे) च कृते प्रत्यञ्च्-प्रत्यञ्चौ इत्यादीनि रूपाणि भवन्ति । ततश्च ईप् प्रत्यये प्रतीची । तद्धिते अञ्चेदीर्घश्च (सा. १-९.५३) इत्यनेन प्रतीचीन: । ई प्रत्यये प्रतीची, तथा च द्वितीया बहुवचने प्रतीच: इत्यादीनि महोदय: साधयति ।

ईपीकारे तिरश्चीस्यादि - (भो.व्या. १-१०-९१) त्यस्मिन् पद्ये (१०) प्रत्यञ्च्-प्रतीची इत्यादिवत् तिर्यक्-तिर्यच् शब्दस्यापि स्त्रीलिङ्गे तिरश्ची, तद्धिते तिरश्चीन:, द्वितीया बहुवचने तिरश्च: इत्यादीनि साधितानि ।

पयश्च पयसी राजन्नि-(भो.व्या. १-१२-१३) त्यस्मिन् पद्ये (११) प्रथमा-द्वितीया एकवचन-द्विवचन-बहुवचनेषु पय:-पयसी-पयांसि, पयोवत् वचस्-तेजस्-मनस्-रजस्-नभस् इत्यादि सकारान्ता नपुंसकलिङ्गा: साधयितव्या: इति स्पष्टयति ।

स्याण्णादि किदपिद्धातोरि-(भो.व्या. २-१-५२) त्यत्र (१२) महोपाध्याय: एकस्मिन् पद्ये परस्परसंबध्धसूत्राणां ग्रथनं विदधाति । णादि: कित् (सा. २-१-२८), द्विश्च-(सा २-१-२९), आम्वोर्णादौ (सा. २-१-३५), ह्रस्व: (सा. २-१-३२) इत्येतेषां चतुर्णां सूत्राणां चमत्कारजनकमन्तर्ग्रथनं प्रदर्शयन् स्वप्रतिज्ञां (१३) संदर्शयति ।

**(४) संक्षेपकारिणी प्रतिभा ।-**

शेषाणामस्य रूपाणामि-(भो.व्या. १-१०.९) त्यत्र (१४) गोदुह् शब्दस्य साधनावसरे गोधुक्-गोधुग् इति रूपं साधयित्वा पद्येऽस्मिन् शेषरूपाणां प्रक्रियासाधना अग्रे यानि सूत्राणि प्रदत्तानि तै: कर्तव्या इति कथयित्वा संक्षेपकुशलो महोपाध्याय: स्पष्टं प्रतिष्ठापयति यत् सर्वाणि रूपाणि साधयितुमाग्रहो रक्ष्यते तदा ग्रन्थोऽयं बृहत्काय: भविष्यति । अत: ग्रन्थभूयस्त्वभयात् प्रक्रियाया: नैरर्थिकी चर्चा नाऽऽदृता ।

सूत्रे विशेषता यत्रे-(भो.व्या. १-१०-१०) त्यस्मिन् पद्ये (१५) यत्र यत्र सूत्राणां वैशिष्ट्यं तान्येव सूत्राणि रूपाणि च वर्णितानि । किन्तु पूर्वकथितसूत्रसाहाय्येन यानि रूपाणि साधयितव्यानि तानि न कथितानि इति स्पष्टीकृत्य ग्रन्थलाघवप्रयत्न: कृतो वर्तते ।

**(५) शैली -**

बुद्धेरन्यानि रूपाणी-(भो.व्या. १-८-१६) त्यस्मिन् पद्ये (१६) बुद्धि शब्दस्य चतुर्थ्येकवचने बुध्द्यै-बुद्धये, पञ्चमी-षष्ठयो: एकवचने च बुद्ध्या: बुद्धे: इति रूपद्वयं भवति इति विज्ञाप्य बुद्धिशब्दस्य शेषरूपाणि हरि-शब्दवत् भवन्ति । किन्तु बुद्धि शब्दस्य स्त्रीलिङ्गत्वात् 'शसोन:' (सा. १-११-७) इति सूत्रेण नकारो न भवति, अत: बुद्धी: इति रूपं निष्पद्यते ।

पितृवन्मातृशब्दोपी-(भो.व्या. १-८-३३) त्यस्मिन् पद्ये [(१७)] मातृशब्दस्य स्त्रीलिङ्गत्वेऽपि पितृशब्दवत्, एवं च स्वसृ शब्दस्य स्त्रीङ्गित्वेऽपि कर्तृशब्दवत् रूपाणि भवन्ति। तत्र द्वितीया बहुवचनस्य शस् प्रत्ययस्य सकारस्य नकार: स्त्रीलिङ्गत्वात् न निष्पद्यते। अत: मातृ: स्वसृ: इति च निष्पन्ने।

गोशब्द: पूर्ववन्नूनमि (भो.व्या. १-८-३४) त्यस्मिन् पद्ये [(१८)] स्वरान्तस्त्रीलिङ्ग प्रकरणस्य समाप्तौ श्रीविनयसागर: स्वनामनिर्देशपूर्वकं ज्ञापयति यत्-गो शब्दस्य रूपाणि पुल्लिङ्गवत्, एवं नौ शब्दस्य रूपाणि ग्लौ शब्दवत् कर्तव्यानि, यत: प्राचीनै: स्वरान्तरूपेषु भेदो न निर्दिष्ट:।

स्वामी वां स जहासोच्चै-(भो.व्या. १-१३-१६) रित्यत्र [(१९)] युष्मदस्मत्सर्वनाम्नो: युष्मदस्मयो: "षष्ठी चतुर्थी द्वितीयाभिस्ते मे वां नौ वस्नसावि" ति (सा. १-११-१४) सूत्रबलात् अत्र युष्मदस्मत्सर्वनाम्नो: वां - नौ इति द्विवचनादेशौ। विकल्पेन वाम्-नौ इति रूपे भवत:। तयोरुदाहरणं रचितं महोपाध्यायेन।

तस्मिन्काले तदा नूनमि-(भो.व्या. १-१४.७) त्यस्मिन् पद्ये [(२०)] अव्ययनिरूपणे तदा-यदा-कदा-एवं च कुत: इति निपातानां अर्था: विशदतया प्रदत्ता:।

प्रथमा कर्तरि स्याच्चेदि-(भो.व्या. १-१६.१०/११) त्यत्र पद्यद्वये [(२१)] प्रथमं कर्तर्यर्थ: कर्मण्यर्थश्च कथं भवत: तत्प्रदर्शितम्। यथा कर्त्रर्थे प्रथमा विभक्ति: स्यात्तदा कर्मण्येर्थे द्वितीया भवति। अर्थात् कर्तरि वाक्ये कर्ता प्रथमायां, कर्म च द्वितीयायां भवत:। तत्र यथाधातुस्तथैव पदं निश्चीयते। कर्मणि वाक्यरचनायां कर्ता तृतीयायां, कर्म च प्रथमायां स्थानं लभेते। अकर्मकधातो: कर्मणिप्रयोगस्य अपरं नाम भावे प्रयोग: इत्येतदपि स्पष्टयति।

क्यबर्थो दृश्यते यत्रे-(भो.व्या. १-१६.६३) त्यत्र [(२२)] हर्म्यात् प्रेक्षते इत्यस्य, हर्म्यमारुह्य प्रेक्षते इति, आसनात् प्रेक्षते इत्यस्य, आसने उपविश्य प्रेक्षते इति चोदाहरणद्वयस्य तात्पर्यं स्पष्टीकुर्वन् कथयति यत्-अत्र क्यबर्थो दृश्यते किन्तु क्यबन्तपदं न दृश्यते। यत: स: क्यब्लोपसंज्ञया ज्ञायते।

परस्या हि विभक्तेश्च-(भो.व्या. १-१७-२१), मार्ग गतो मार्गगतस्तथैवे(भो.व्या. १-१७.३५) ति पद्यद्वये [(२३)] वा टाङ्यो: (१-१३.९) इति सारस्वतसूत्रेण तृतीयैकवचने टा प्रत्ययस्थाने, सप्तम्येकवचनस्य ङि प्रत्ययस्य च स्थाने विकल्पेन अम्-प्रत्यये कृते सति उपकुम्भम्, उपकुम्भेन, एवं तत्पुरूष समासस्य द्वितीयादिसप्तम्यन्तोदाहरणानि सविग्रहं प्रदत्तानि।

ह्योवृष्टिरभवन्नूनमि-(भो.व्या. २-१-४९) त्यत्र [(२४)] भू धातो: लङ्लकारे (ह्यस्तनभूतकाले) ह्योऽव्ययं प्रथमपुरूषैकवचने, अनद्यतनेऽतीते (सा. २-१-२५) इति सूत्रेण सह प्रयुज्य स्पष्टार्थं विधत्ते।

चिन्तां त्वं खलु मा कार्षीरि-(भा.व्या. २-१-६३) त्यस्मिन् पद्ये [(२५)] भू धातो: अनद्यतनभूतकालस्य भविता - इति क्रियापदेन श्वस्तने (सा. २-१-४०) इति सूत्रस्य विशेष: प्रयोगो भविष्यदर्थकथनरूपेण कृतो दृश्यते।

ओहाङ् गतौ च माङ्मान-(भो.व्या. २-३-३२) इत्यस्मिन् (२६) भृञां लुकि (सा. २-३-१४) इति सारस्वतसूत्रस्य बहुत्वग्रहणं स्पष्टयन् महोपाध्याय: ओहाङ्(१६६) गतौ, माङ्(१६७) माने इति च धातुद्वयं सूचयति ।

वस्तूद्दिश्य प्रवर्तेते-(भो.व्या. २-१७-१०६५) त्यस्मिन् पद्ये (२७) मुख्यकर्म-गौणकर्मणो: भेदं प्रदर्शयन् महोपाध्याय: कथयति यत्-वस्तूद्दिश्य यत्कर्म प्रवर्तते तत् मुख्यं प्रधानं वा कर्म । एवं च निमित्तमात्रमेव यत्कर्म स्यात् तत् गौणकर्मेति कथ्यते ।

**(५) शैली - (स्पष्टता) -**

इत्यन्यद् रूपसिद्ध्यर्थमि-(भो.व्य. १-९-७) त्यस्मिन् पद्ये (२८) अन्यद् (त्) सर्वनाम्नो नपुंसकलिङ्गे रूपसिद्ध्यर्थं अन्येत्यादि शब्देषु परेषु सि-अम् अनयो: श्तु (तु) आदेश:, श्त्वन्यादे: (सा. १.८.८.) इत्यनेन सूत्रेण भवति । अन्यत् - अन्यद् इति रूपाणि अन्ये-अन्यानि इति च शेषरूपाणि सर्ववत् भवन्ति इति ज्ञापितम् ।

भूपस्य पत्नी खलु भूपपत्नी-(भो.व्या. १-१७-३६) त्यत्र (२९) तत्पुरुष समासस्य सविग्रहमुदाहरणमुपजातिछन्दोबद्धं महोपाध्याय: स्थापयति ।

राजा भवति धर्मिष्ठ:-(भो.व्या. २-१-२७) इत्यस्मिन् पद्ये (३०) महोपाध्याय: भू धातो: लट् लकारस्य (वर्तमानकालस्य) प्रथमपुरुषस्य-भवति, मध्यमपुरुषस्य-भवसि, उत्तमपुरुषस्य-भवामि, तथा चोत्तमपुरुषद्विवचनस्य-भवाव:, इति रूपाणि प्रयोगसहितानि पुरस्करोति ।

तपतिस्यात्तपेन्नूनमि-(भो.व्या. २-१-१७६/१७७) त्यत्र पद्य द्वये (३१) तप (२३) सन्तापे धातो: सर्वाणि प्रथमपुरुषैकवचनानां क्रियापदानि प्रदर्शितानि् । यथा तपति-तपेत् -तपतु-अतपत्-तताप-तेपतु:-तेपु:-ततप्य-तेपिथ । किन्तु तत: परं विशेषनिर्देशेन सिच्परे अताप्सीत्-अताप्ताम्-अताप्सु: इति च रूपाणि दर्शितानि ।

न्यादयोऽन्यन्तनिष्कर्मे-(भो.व्या. २-१७-१०६६) त्यस्मिन् पद्ये नी(३२) (नय्) इत्यादय: धातव: प्रेरकान्ता:, कर्मरहितगत्यर्थका: वा स्यु: तदा मुख्यकर्मण: प्रत्ययो भवति । किन्तु दुह् (दोग्धि) इत्यादि धातूनां गौणकर्मणि अन्यकर्मणि वा यथारूचि प्रत्यया: भवन्ति । एवं वार्तिकरूपेण अनुक्तं चिन्तयित्वा स्पष्टमर्थं ददाति ।

इष्णु-स्नु-क्नुर्भवेध्धातोरि (भा.व्या. ३-२-१४२/१४६) इत्यस्मित् पद्यसमूहे ३३ शीलेऽर्थे धातो:, इष्णु-स्नु-क्नु: (सा. ३-४-२) इति सूत्रेण इष्णु-स्नु-क्नु प्रत्यया: भवन्ति । यथा प्रभविष्णु: इत्यादि । स्नु प्रत्यये परे जि (जयति), भू (भवति) धात्वो: इडागमो गुणश्च न भवत: । अत्रैतत् स्पष्टं कृतम् । शीलेऽर्थे इष्णु-प्रत्यये कृते अलङ्करिष्णु:, निराकरिष्णु: इत्यादय: । शीलेऽर्थे स्नु-प्रत्यये कृते उत्पतिष्णु: भविष्णु: इत्यादीनि रूपाणि । यदि इष्णुप्रत्यय: परे स्यात्तदा ञि प्रत्ययस्य प्रेरकार्थे लोपो न भवति यथा कारयिष्णु: इति । शीलेऽर्थे स्नु प्रत्यये कृते ग्लास्नु:, जिष्णु:, स्थास्नु: इत्यादीनि रूपाणि भवन्ति

। एवञ्च क्नु-प्रत्यये कृते विष्णु:, त्रस्नु:, गृध्नु:, धृष्णु: क्षिप्नु: इत्यादीनि रूपाणि भवन्ति ।

अत्र महोपाध्याय:विनयसागर: स्पष्टयति यत् एते प्रयोगा: लोकात्-(अन्यव्याकरणात्) उद्धृता: । एतेन सारस्वतव्याकरणे एतेषां प्रयोगाणामभावो स्पष्टो भवति ।

**(६) परिगणनम् -**

सर्वोविश्व उभोभय-(भो.व्या. १-६.२७/२८) इति पद्यद्वये (३४) भोज-व्याकरणे सर्वादिगणे (३५) सर्व-विश्व-उभ-उभय-अन्य-अन्यतर-इतर-त्वत्-त्व-डतर-डतम-सम-सिम-नेम-एक-पूर्व-दक्षिण-पर-अवर-उत्तर-अधर-स्व-अन्तर-अपर-त्यद्-तद्-यत्-इदम्-अदस्-एतत्-द्वि-किम्-युष्मद्-अस्मद्-इति चतु:स्त्रिंशत्(३४) सर्वनामानि परिगणितानि । (३६)

**(७) वैदुष्यम्-**

नौकायां वा सुरैकायामि-(भो.व्या. १-१५-१२) त्यस्मिन् पद्ये (३७) ह्रस्वो वा स्त्रियाम् (सा. १-१२-३) इति सूत्रे वा - इति निपातग्रहणात् वेणीका-वेणिका, नदीका-नदिका वत् नौका-सुरैका-सुग्लौका इत्येतेषां शब्दानां ह्रस्वत्वं प्रतिषेधयन् महोपाध्याय: पूर्व-शब्दस्य पूर्वोपसर्गस्य च मध्ये विशदरूपेण भेदं दर्शयन् पाण्डित्यं द्योतयति ।

कार्यं कर्मत्वपर्याय-(भो.व्या. १-१६-१९/२०) इति पद्यद्वये (३८) कार्यशब्द: कर्मपर्याय: (समानार्थक:) वर्तते । तत्कार्यं चतु:प्रकारकं विवेचयन् महोपाध्याय: एकत्वे द्विगुर्द्वंद्वौ (सा. १-१४-३३) (३९) इति सूत्रेण निष्पद्यमानं उत्पाद्यं-आप्यं-संस्कार्य-विकार्यमिति द्वंद्वं क्लीबलिङ्गं दर्शयति । तद्यथा उत्पादार्हम्-उत्पाद्यम् , प्राप्तियोग्यं-प्राप्यं, संस्कारार्हं-संस्कार्यं, अवस्थान्तरं प्राप्यं च विकार्यमिति कर्मण: चतुर्विधत्वं-प्रतिपादयति ।

संयमाय श्रुतं धत्त-(भो.व्या. १-१६-५९) इत्यस्मिन् पद्ये (४०) तादर्थ्ये चतुर्थी (सा. १-१३-४५) इति सूत्रेण तादर्थ्यार्थे चतुर्थीविभक्ते: उदाहरणानि कारणमालालङ्कारेण स्पष्टीकृतानि । तद्यथा श्रुतं संयमाय, संयमो धर्माय, धर्मश्च मोक्षाय, किन्तु धनं दानाय भुक्तये च भवतीति श्रुतस्य (ज्ञानस्य) धनस्य च महान् भेद: सरलया शैल्या प्रतिष्ठापित: ।

सर्व: स्याच्छन्दसि स्यादिरि-(भो.व्या. १-१६.७०/७१) ति पद्यद्वये (४१) तदिदं सर्वैर्वैयाकरण परम्पराविद्भि: सम्यक् ज्ञायते यत्-सारस्वतं व्याकरणं सर्वाणि छन्दोविषयकसूत्राणि अपोह्य सरलतमत्वं भजते । तथापि महोपाध्याय: अत्र छन्दसि सि इत्यादि सर्वा: विभक्तय: व्यत्ययेन भवन्ति, यथा दधि जुहोति इत्यस्य प्रथमाविभक्ते: दध्ना जुहोति इति तृतीयार्थं प्रतिपादयति । अथ च वेदे विभक्तीनां, कालस्य, वचनस्य, लिङ्गस्य, प्रकृते: प्रत्ययस्य च लोप: इति षद् प्रकारको विधि: महोपाध्यायेन स्पष्टीकृत: ।

गुरुशुश्रूषक: शिष्य-(भो.व्या. २-१-३५) इत्यत्र (४२) महोपाध्याय: विधिसम्भावनयो: (सा. २-१.१८) इति सूत्रस्य विधिसम्भावनापदयोरर्थं स्पष्टयन् कथयति यत्-भू धातो: भवेत् विध्यर्थ: संभावनाया: (कल्पनस्य) अर्थश्च सोदाहरणं ददाति ।

भवन्तश्चिरमायुष्मानि-(भो.व्या. २-१-४३)त्यस्मिन् पद्ये (४३) भू धातोः लोट् लकारे (आज्ञार्थे) तुह्योस्तातङ्ङाशिषि वा (सा. २-१-२३) इत्यनेन सूत्रेण मध्यमपुरुषैकवचने विकल्पेन तातङि कृते भवतात्, प्रथमपुरुषैकवचने भवतु, एवं च मध्यमपुरुषैकवचने भव इति पदत्रयाणामुदाहरणं प्रस्थापयति ।

महापराक्रमी भीम-(भो.व्या. २-१-५८) इत्यस्मिन् पद्ये (४४) सर्वेषु कर्तृषु कृते दीपकालङ्कारोदाहरणभूतं बभूवेति एकमेव क्रियापदं वर्तते ।

ददौ दानं तदा दाते-(भो.व्या. २-१-२५६)ति पद्ये (४५) ददौ-पपौ-तस्थौ-ययौ इति दा-पा-स्था-या धातूनां परोक्षे णपि परे रूपाणि प्रदर्शयता महोपाध्यायेन द-द-प-प-त-त-धन-वनमिति च वर्णानुप्रासालङ्कारशोभितं कृतम् ।

पुण्यैः संभाव्यते पुंसामि-(भो.व्या. २-१-२६६) त्यस्मिन् पद्ये (४६) मेरूसमाः शैलाः तेरूः इत्यत्र तेरूः मेरूः इति शब्दानुप्रासः, संभाव्यासम्भाव्येति - विरोधालङ्कारः तृतीयचतुर्थचरणयोश्च अर्थान्तरन्यासाऽलङ्कारः, एवं त्रयाणामलङ्काराणां सङ्करः न्यस्तः । (तेरू इति तृ (प्लवने) धातोः लिट् लकारस्य रूपं वर्तते ।)

मुखकमलं तिलकमलमि-(भो.व्या. २-७-७३) त्यत्र (४७) अलम्-पूर्वेषां चकार-चक्रतुः-चक्रुः इति क्रियापदानां यथासंख्यालङ्कारप्रयोगः सुष्ठुरूपेण कृतः । तद्यथा-हे तन्वि ! तव मुखकमलं तिलकमलञ्चकार, मञ्जिरौ तव पादपुण्डरीक-कमलञ्चक्रतुः, भ्रमरगणाः तव अलकम् अलञ्चक्रुः इति ।

धातुपाठे च धातूनामि-(भो.व्या. २-१०-३६) त्यस्मिन् पद्ये (४८) मितांह्रस्वे-(सा. २-१०-५) ति सूत्रव्याख्यानावसरे महोपाध्यायः स्वकीयां विद्वत्तां प्रज्ञापयन् लिखति यत्-धातुपाठे पठितानां मितां धातुनामिति । अनेन निर्देशेन स्पष्टतरं ज्ञायते यत्-सारस्वतो धातुपाठः भवितव्य एव, किन्तु प्रकाशनं न कुत्रापि ज्ञायते । आशासेऽधुना येनकेनापि एतदर्थं प्रयत्नः कार्यः ।

निन्ये विजनमजागरी-(भो.व्या. २-१७-१०६७) त्यत्र (४९) नी (नयति) इत्यादि धातूनां खलकपोतिकान्यायेन प्रेरकरूपाणि प्रदत्तानि । यथा अनन्तेन (भगवता श्रीकृष्णेन) गोपी विजने (एकान्ते) निन्ये, रजनीमजागरि, मदम् अगमि, संभोगम् अयाचि, हास्यमकारि एवं भावश्च अकारि ।

कः कौ के कं कौ कान् हसती-(भो.व्या. १-१०-५८) त्यत्र (५०) कूटश्लोके किम्-सर्वनाम्नः हस् (हसति) धातुरूपयुक्ता यथासंख्यालङ्कारमण्डिता प्रश्नोत्तरी वर्तते । तद्यथा-हरिणाक्ष्याः कः कं हसति ? अधरः पल्लवं हसति । कौ कौ हसतः ? अङ्घ्री (चरणौ) पद्मौ हसतः । के कान् हसन्ति ? दन्ताः कुन्दस्यकोरकान् हसन्ति ।

**(८) प्रक्रियान्ते रूपोल्लेखः -**

देवो देवगृहे विराजतितरा-(भो.व्या. १-६-२५) मिति पद्ये (५१) देव इति

अकारान्तपुंल्लिङ्गशब्दस्य प्रथमैकवचनरूपादारभ्य सम्बोधनैवचनपर्यन्तं सर्वाणि रूपाणि प्रदत्तानि । अत्र रामो राजमणिः सदा विजयते (५२) इति रामरक्षास्तोत्रस्य-सप्तत्रिंशत्तम (३७) पद्यसदृशं महोपाध्यायस्य पद्ये रामरक्षास्तोत्रस्य प्रभावः स्पष्टमेव ज्ञायते ।

विराजते व्योमपथे च भानु - (भो.व्या. १-६.६८/६९) रिति पद्ये (५३) उकारान्तपुंल्लिङ्गभानुशब्दस्य सर्वासां विभक्तीनां एकवचनस्य रूपाणि प्रदत्तानि ।

कति ते स्नेहसम्बन्धा-(भो.व्या. १-६-९२) इति पद्ये (५४), कति-तति-यति-तति इति शब्दानां प्रयोगे अर्थानुसन्धानं प्रकटयति उदाहरणैः ।

ग्लौर्ग्लावौ ग्लावः-(भो.व्या. १-७.१२८/१२९) इति पद्यद्वये (५५) ग्लौ शब्दस्य सर्वासां विभक्तीनां सर्वाणि रूपाणि आर्या (छन्दो) द्वये सुचारूरूपेण विलसन्ति ।

नूनं लक्ष्मीर्लक्ष्म्यौलक्ष्म्य-(भो.व्या. १-६.२७०/२७१) इति पद्यद्वये (५६) ईकारान्त लक्ष्मीशब्दस्य सर्वाणि रूपाणि विद्युन्मालावृत्तालङ्कृतानि राजन्ते ।

विश्वपा भवति विश्वधारक-(भो.व्या. १-६.५७/५८) इति पद्यद्वये (५७) विश्वपाशब्दस्य रूपाण्युदाहरणतया दृश्यन्ते ।

कृतं तेनोपकुम्भेने-(भो.व्या. १-१७-२२/२३) ति पद्यद्वये (५८) उपकुम्भात् उपकुम्भे इत्यादीनि रूपाणि सवैकल्पिकानि सोदाहरणानि च प्रदत्तानि ।

**(९) छन्दः प्रभुत्वम्**

भोजव्याकरणस्य अष्टाविंशत्युत्तरैकविंशतिशततमेषु-(२१२८) पद्येषु बहुलानि पद्यान्यनुष्टुप्च्छन्दोबध्धानि सन्ति । अपरेषु एकादशोत्तरद्विशतसङ्ख्यकेषु पद्येषु आर्या, आर्यागीतिः, उपजातिः, दोधकम्, शार्दूलविक्रीडितम्, शिखरिणीत्यादीनि वृत्तानि योजितानि । अत्राऽधः दिङ्मात्रमेव प्रस्तूयते ।

ग्लौर्ग्लावौ ग्लावः-(भो.व्या. १-७.१२८/१२९) इत्यस्मिन् पद्यद्वये (५९) ग्लौ शब्दस्य सर्वासां विभक्तीनां सर्वाणि रूपाणि आर्याछन्दोद्वये (६०) सुचारूरूपेण विलसन्ति । अनेन श्रीविनयसागरस्य छन्दःप्रभुत्वं द्योत्यते ।

नूनं लक्ष्मीर्लक्ष्म्यौलक्ष्म्य-(भो.व्या. १-८.२६/२७) इत्यस्मिन् पद्यद्वये (६१) ईकारान्त स्त्रीलिङ्ग लक्ष्मीशब्दस्य सर्वाणि रूपाणि विद्युन्मालावृत्तालङ्कृतानि राजन्ते ।

वार्यथ वारिणी वारीणि-(भो.व्या. १-६.२०) इत्यस्मिन् पद्ये (६२) वारि शब्दस्य प्रथमाद्वितीययोः वारि-वारिणी-वारीणि (प्रथमा-द्वितीया), तृतीयायां वारिणा-वारिभ्याम्-वारिभिः, चतुर्थ्यां वारिणे-वारिभ्याम्-वारिभ्यः, एवं षष्ठी बहुवचने वारीणाम् इत्यादीनि रूपाणि ज्ञापयित्वा वारि-शब्दस्य नपुंसकलिङ्गत्वात् रूपाणि प्रदत्तानि । अस्मिन् पद्ये अनुष्टुप् छन्दोबध्धं वारि शब्दस्य रूपाख्यानं विद्वन्मनोरञ्जकमस्ति । एवं मधुशब्दस्यापि रूपाणि वारिशब्दवत् भवन्ति इति ज्ञापितम् ।

# प्रदानम् ।

## टिप्पणी

(१) हे देव कुरु कारुण्यं अभीष्टं देहि भो जिन !
भगो नित्यं नमस्ते स्वम् अघो घातय घस्मरम् ॥ १,६.२४ ॥

(२) देवावुभौ शमुभये हरिशङ्कराख्यौ ।
लोकोपकारप्रतिभा च समाश्रितोभौ ।
ताभ्यां हताः स्वरिपवो नितरामुभाभ्याम्
कालत्रयेऽस्तु सततं तु नमो ह्युभाभ्याम् ॥
पीयुषमानय सखे ! प्रणमन्नुभाभ्याम् ,
कीर्त्या धरा धवलिता ह्युभयोरशेषा ।
नित्यं विभाति करुणा ह्युभयोर्धरित्र्याम् ,
तस्मादुभौ ! मयि मुदे भवतं नितान्तम् ॥ (१,६.४६/४७)

(३) विभ्राजते त्रिभुवने हरिरेकदेवः, पद्माऽपि तं हरिमिहाऽपि सुखं भुनक्ति ।
क्षिप्तो बलिश्च हरिणा धरणीतलेऽस्मिन्, हर्षाधिकाय हरये गुरवे नमोऽस्तु ॥
जातं तथा सकलवस्तु हरेस्त्रिलोक्यां, शङ्खेश्वराख्यमिह तीर्थमिदं हरेश्च ।
साम्राज्यराज्यपदवी च हरौ विभाति, सौख्यं कुरूष्व सततं मयि हे हरे ! हि ॥
(१,६.६६/६७)

(४) द्रष्टव्यम् अत्रैव भोजव्याकरणस्य साङ्गोपाङ्गमध्यनम्

(५) स्वामी वां स जहासोच्चै-रीष्ट्वा नौ दानयाचनाम् ।
राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः ॥ (१,१३.१६)

(६) देवो वामवताद्विष्णुर्नरकान्नौ जनार्दनः ।
स्वामी वो बलवान् राजा स्वामी नोऽसौ जनार्दनः ॥ (१,१३.१७)

(७) ब्रह्मघ्नश्चाऽथ ब्रह्मघ्ने-त्यादीनि स्युर्यथाक्रमात् ।
जघान णिति ब्राह्मघ्निर्ञ्णिति ह्रसे विशेषता ॥ (१,१०.३७)

(८) दृश्-स्पृश्-सृज्-क्रुञ्च्-दधृक्-त्विजां च युजिष्णिक् तथा स्रगेतेषाम् ।
सूत्रे बहुत्वकथनाद् अनेन कुत्वं भवेदत्र (१,१०.८४)

(९) प्रतीची तु स्त्रियां रूपं प्रतीचीनस्तु तद्धिते ।
प्रतीची क्लीबलिङ्गे हि प्रतीच इह सम्भवेत् ॥ (१,१०.८७)

(१०) ईपीकारे तिरश्ची स्यात् तिरश्चीनोऽथ तद्धिते ।
तिरश्च एवमग्रेऽपि शसादौ तु स्वरे परे ॥ (१,१०.९१)

(११) पयश्च पयसी राजन् ! पयांसि तु पुनस्तथा ।
एवं वचो मनस्तेजो रजो नभो ह्ययो वय: ॥ (१,१२.१३)

(१२) स्याण्णादि: किदपिद्धातो: द्विश्च णादौ परे च प्राक् ।
आभ्वोर्णादौ ततो ह्रस्व: पूर्वसम्बन्धिनो भवेत् ॥ (२,१.५२)

(१३) अन्तर्भूतानि सूत्राणि राजन्ते पद्यराजिषु ।
भ्रमद्द्विरेफमालासु पद्मानीव सरोवरे ॥ (३.२४४)

(१४) शेषाणामस्य रूपाणां प्रक्रिया पूर्वसूत्रत: ।
सुगमत्वाच्च नालेखीद् ग्रन्थभूयस्त्वभीतित: ॥ (१,,१०.९)

(१५) सूत्रविशेषता यत्र तद्रूपमिह लिख्यते ।
यत्साध्यं प्राक्तनै सूत्रैस्तद्रूपं लिख्यते न च ॥ (१,१०.१०)

(१६) बुद्धेरन्यानि रूपाणि साध्यानि हरिवत् परम् ।
स्त्रीलिङ्गत्वाच्च नत्वस्याऽभाव इति विशेषता ॥ (१,८.१६)

(१७) पितृवन्मातृशब्दोऽपि स्वसृशब्दस्तु कर्तृवत् ।
स्त्रीलिङ्गत्वान्नत्वाभावो रैशब्दस्त्विह पूर्ववत् ॥ (१,८.३३)

(१८) गोशब्द: पूर्ववन्नूनं नौशब्दो ग्लौवदेव च ।
नाऽन्तरत्वादिति ब्रूते विद्वद्विनयसागर: ॥ (१,८.३४)

(१९) द्रष्टव्या टिप्पणी क्रमांक: ५

(२०) तस्मिन् काले तदा नूनं यस्मिन् काले यदा पुन: ।
कस्मिन् काले कदा प्रोक्त: तस्मादिति तत: कुत: ॥ (१,१४.७)

(२१) प्रथमा कर्तरि स्याच्चेत् कर्मणि द्वितीया तदा ।
उक्त: कर्तृप्रयोगोऽयं यथाधातुस्तथा पदम् ॥
तृतीया कर्तरि स्याच्चेत् कर्मणि प्रथमा तदा ।
उक्त: कर्मप्रयोगोऽयं भावोक्ति: स्यादकर्मकात् ॥ (१,१६.१०/११)

(२२) क्यबर्थो दृश्यते यत्र क्यबन्तं नैव दृश्यते ।
क्यब्लोपत्वमिहाख्यातं तदेव विबुधैर्वरै: ॥ (१,१६.६३)

(२३) परस्या हि विभक्तेश्च वा टाङ्योः शारदेच्छया ।
वर्तते उपकुम्भं यत् तदुपकुम्भमानय ॥ (१,१७.२१)
मार्गं गतो मार्गगतस्तथैव शस्त्रेण भिन्नः खलु शस्त्रभिन्नः ।
यूपा यदारू भूवि यूपदारू चोराद्भयं चोरभयं तथैव ॥ (१,१७.३५)

(२४) ह्यो वृष्टिरभवन्नूनं सर्वधान्यस्य हेतवे ।
ह्योऽभवत्ते च सत्पुत्रः स्वकीयान्वयदीप्तये ॥ (२,१.४९)

(२५) चिन्तां त्वं खलु मा कार्षीर्ललने ! गतभर्तृके ।
भविता श्वस्तने भर्तृ-स्तवागमनमेव यत् ॥ (२,१.६३)

(२६) ओहाङ् गतौ च माङ् माने एतयोर्ग्रहणं सुधीः ।
बहुत्वग्रहणात् सूत्रे भारत्या ज्ञापितं त्विति ॥ (२,२.३३)

(२७) वस्तूद्दिश्य प्रवर्तेत मुख्यं कर्म तदुच्यते ।
निमित्तमात्रमपरं तस्माद् गौणं तदेव हि ॥ (२,१७.४३)

(२८) इत्यन्यद् रूपसिद्ध्यर्थं श्त्वन्यादेः परयोः स्यमोः ।
अन्येऽन्यानि पुनस्त्वस्य शेषरूपाणि सर्ववत् ॥ (१,९.७)

(२९) भूपस्य पत्नी खलु भूपपत्नी त्वक्षेषु शौण्डः पुनरक्षशौण्डः ।
तर्केषु रागो ननु तर्कराग एवंविधस्तत्पुरुषो भवेच्च ॥ (१,१७.३६)

(३०) राजा भवति धर्मिष्ठः साधुस्त्वं भवसि ध्रुवम् ।
भवाम्यहं च तत्वज्ञो भवावस्त्वमहं कवी ॥ (२,१.२७)

(३१) तपतिस्यात्तपेन्नूनं तपत्वतपदेव हि ।
तताप तेपतुस्तेपुस्ततप्थ तेपित प्रभो ! ॥
अताप्सीदिति सावेवं झसादिति सलोपता ।
अताप्तां च तथाऽताप्सु-स्तप् सन्तापे क्रिया इमाः ॥ (२,१.१७६/१७७)

(३२) न्यादयोऽन्यन्त निष्कर्म गत्यर्था मुख्यकर्मणि ।
प्रत्ययं याति दुह्यादिगौणेऽन्ये तु यथारूचि ॥ (२,१७.४४)

(३३) इष्णु-स्नु-क्नुर्भवेद् धातोः शीलेऽर्थे हि यथाक्रमात् ।
जिभ्वोरिड् न गुणाभावः स्नुप्रत्यये परे परम् ॥ (३,१.१४२)
अलङ्करिष्णुश्च निराकरिष्णुर्ग्रसिष्णुरेव प्रजनिष्णुरेव ।
अपत्रपिष्णुः पुनरूत्पतिष्णुर्वर्तिष्णुवर्धिष्णुचरिष्णवश्च ॥ (३,१.१४३)

तथोत्पतिष्णुः पुनरूत्पदिष्णुर्भविष्णुरोचिष्णुसहिष्णवश्च ।
भ्राजिष्णुरेवं पुनरुन्मदिष्णुर्ण्यलोपताऽत्रैव च कारयिष्णुः ॥ (३,१.१४४)
ग्लास्नुजिष्णुः स्थास्नु-भूष्णुम्लास्नुस्तथैव परिमाक्ष्णुः ।
क्षिष्णुः पक्ष्णुप्रमुखाः स्नुप्रत्ययान्ताः प्रयोगाः स्युः ॥ (३,१.१४५)
विष्णुस्त्रस्तुश्च गृध्नुश्च धृष्णुः क्षिप्नुस्तथैव च ।
प्रयोगाः क्नु प्रत्ययान्ताः एते लोकात् समुद्धृताः ॥ (३,१.१४६)

(३४) सर्वो विश्व उभोभयमन्यान्यतरेतराः पुनः त्वत्वौ ।
डतरडतमौ समसिमावेवं नेमैकपूर्वाश्च ॥
दक्षिणपरावरोत्तरमधरस्वान्तरमथापरस्त्यद्तद् ।
यदिदमदसेतदेव द्वि किं तथा युष्मदस्मच्च ॥ (१,३.२७/२८)

(३५) पाणिनीयव्याकरणे पञ्चत्रिंशत् (३५) सर्वनामानि परिगणितानि । तत्र सर्वादिगणे यद्यपि भवतु - सर्वनाम्नः च निर्देशो न वर्तते । किन्तु दशमप्रकरणस्य ९४-९८ तमे श्लोकद्वये भवत् शब्दस्य भवतु-भवत् इति प्रकारद्वयेन चर्चा प्रदत्ता वर्तते ।

(३६) तुलनीयम् - श्रीभट्टोजिदीक्षितचरणानां वैयाकरणसिध्धान्तकौमुद्या अजन्त - पुलिङ्गप्रकरणे-२१७ / आमि सर्वनाम्नः सुट् (पा. ७,१.५२) सर्वादयश्च पञ्चत्रिंशत् (३५) पृ. ४९

(३७) नौकायां वा सुरैकायां सुग्लौकायां न ह्रस्वता ।
अस्मिन् सूत्रे महाराज ! वेति निपातसंग्रहात् ॥ (१,१५.१२)

(३८) कार्यं कर्मत्वपर्यायस्तत्कार्यं च चतुर्विधम् ।
स्यादुत्पाद्याऽऽप्य-संस्कार्य-विकार्यं लिख्यते च तत् ॥ (१,१६.१९)
उत्पादार्हं तदुत्पाद्यं आप्त्यार्हमाप्यमेव च ।
संस्क्रियतेऽत्र संस्कार्यं विकार्यमवस्थान्तरम् ॥ (१,१६.२०)

(३९) स्त एकत्वे द्विगुद्वंद्वौ क्लीबलिङ्गौ यथा भवेत् ।
अत्र द्वंद्वे समाहारे पद्मपारदपादपम् ॥ (१,१७.५६)

(४०) संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ।
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये ॥ (१,१६.५९)

(४१) सर्वःस्याच्छन्दसि स्यादिः सर्वत्र व्यत्ययेन च ।

दधि जुहोति चेत्यर्थे दध्ना जुहोति याजकः ॥ (१,१६.७०)

(४२) गुरुशुश्रूषकः शिष्यो भवेदिति विधिः स्मृतः ।
ब्राह्मणत्वादसौ वेद-पारगश्चेति कल्पनम् ॥ (२,१.३५)

(४३) भवताच्चिरमायुष्मान् भवान् भवतु तत्त्वविद् ।
अध्ययनोद्यतः सौम्य ! भव त्वं बुद्धिवृद्धये ॥ (२,१.४३)

(४४) महापराक्रमी भीमो न्यायधर्मी युधिष्ठिरः ।
कर्णस्त्यागी, नलो रूपी, बभूव बलवान् बलिः ॥ (२,१.५८)

(४५) ददौ दानं तदा दाता पपौ पेयं मुदा पुनः ।
तस्थौ प्रीतस्तदा स्थाने धनं हित्वा वनं ययौ ॥ (२,१.२५६)

(४६) पुण्यैः सम्भाव्यते पुंसामसंभाव्यमपि क्षितौ ।
तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ॥ (२,१.२६६)

(४७) मुखकमलं तिलकमलं मञ्जिरौ पादपुण्डरीककमलम् ।
अलकमलं भ्रमरगणास्तव तन्वि ! चकार चक्रतुःचक्रुः ॥ (२,७.७३)

(४८) धातुपाठे च धातूनां पठितानां पठितानां धरापते ।
मितां ह्रस्वो भवेद् ञौ च यद् घटयत्यजीघटत् ॥ (२,१०.३६)

(४९) निन्ये विजनमजागरि रजनीमगमि मदमयाचि संभोगम् ।
गोपी हास्यमकार्यत भावश्चैनामनन्तेन ॥ (२,१७.४५)

(५०) कः कौ के कं कौ कान् हसति हसतो हसन्ति हरिणाक्ष्याः ।
अधरः पल्लवमङ्घ्री पद्मौ कुन्दस्य कोरकान् दन्ताः ॥ (१,१०.५८)

(५१) देवो देवगृहे विराजतितरां देवं दया संश्रिता ।
देवेन प्रहता स्वकीयरिपवो देवाय शश्वन्नमः ॥
देवादेव सुधां समानय सखे ! देवस्य कीर्तिः प्रिया ।
देवे रूपमिदं मनोहरमहो हे देव सौख्यं कुरू ॥ (१,६.२५)

(५२) रामोराजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहताः निशाचरचमू रामाय तस्मै नमः ॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो (हे) राम नामुद्धर ॥ (रामरक्षास्तोत्रम् -३७)

(५३) विराजते व्योमपथे च भानुः समाश्रितं ज्योतिरिदं च भानुम् ।
तद् भानुना ध्वान्तमहो हतं च भद्रं च तस्मै किल भानवेऽस्तु ॥
प्रवर्तितो वासर एव भानोः भानोः प्रतापोऽस्ति च विश्ववर्ती ।
जगत्प्रकाशी गुण एव भानौ ममैव सौख्यं कुरू नाम भानो ॥ (१,६.६८/६९)

(५४) कति ते स्नेहसमान्धाः तति ते दुःखदायिनः ।
यति ते नागशीर्षाणि तति ते नागवेदनाः ॥ (१,६.९२)

(५५) ग्लौर्ग्लावौ ग्लावो ग्ला -वं ग्लावौ ग्लाव एव च ग्लावा ।
ग्लौभ्यां ग्लौभिर्ग्लावे -ग्लौभ्यां ग्लौभ्यस्तथाहि ग्लावश्च ॥
ग्लौभ्यां ग्लौभ्यो ग्लावो ग्लावोर्ग्लावां पुनर्हि ग्लावि स्युः,
ग्लावो ग्लौष्वथ हे ग्लौ-रित्यादीनि च नृपेन्द्र ! रूपाणि (१,७.१२८/१२९)

(५६) नूनं लक्ष्मीर्लक्ष्म्यौ लक्ष्म्यो लक्ष्मीं लक्ष्म्यौ लक्ष्मी लक्ष्म्या,
लक्ष्मीभ्यां वै लक्ष्मीभिस्तु लक्ष्म्यै लक्ष्मीभ्यां लक्ष्मीभ्यश्च ।
लक्ष्म्या लक्ष्मीभ्यां लक्ष्मीभ्यो लक्ष्म्या लक्ष्म्योर्वा लक्ष्मीणाम्,
लक्ष्म्यां लक्ष्म्योर्लक्ष्मीष्वेव लक्ष्म्याह्वाने लक्ष्म्यः ॥ (१,८.२६/२७)

(५७) विश्वपा भवति विश्वधारको विश्वपां किल समाश्रितं जंगत् ।
विश्वपैव क्रियते सुखं भुवि भक्तिरेव ननु मेऽस्तु विश्वपे ॥
हीन एव मघवा हि विश्वपो विश्वपश्च कृपया वरात्मजाः ।
विश्वपि त्रिभुवनं विराजते विश्वपा मम रिपुक्षयं कुरु ॥ (१,६.५७/५८)

(५८) कृतं तेनोपकुम्भेन चोपकुम्भं कृतं मुदा ।
उपकुम्भं त्वरादेहि चोपकुम्भात् समानय ॥
उपकुम्भ-मयं देश उपकुम्भे निधेहि च ।
भो निधेह्युपकुम्भं तद् उपकुम्भं निमन्त्रणे ॥ (१,१७.२२/२३)

(५९) द्रष्टव्यम् टिप्पणी क्रमांक ५५

(६०) द्रष्टव्यम् अत्रैव अध्यायः - भोजव्याकरणस्य साङ्गोपाङ्गमाध्ययनम्

(६१) द्रष्टव्यम् टिप्पणी क्रमांक ५६

(६२) वार्यथ वारिणी वारीण्येवमग्रेऽपि वारिणा ।
वारिभ्यां वारिभि-र्वारि-णे वारीणां तथा मधु ॥ (१,९.२०)